ततश्चाज्ञापितो राज्ञा रक्षकस्त्वयकाऽऽशु रे!।
सोऽत्र बध्वा दुराचारो वणिगानीयतामिति ॥ १० ॥
ज्ञातव्यतिकरः सोऽथ स्वयमेत्य नृपान्तिकम्।
दीनारानार्पयत्तस्य नृपस्यैवं शशंस च ॥ ११ ॥
तस्मिन् काले मया देव! शोकाकुलितचेतसा।
शबकृत्यविहस्तेन दत्तमस्य धनं न हि ॥ १२ ॥
लोकाचारेण दिवसत्रितयं विगतं [1]यतः।
द्रव्यदानविलम्बेन दोषः को नाम मे प्रभो! ॥ १३ ॥
निर्दोष इति भूपालो वणिजं विससर्ज तम्।
मित्रानन्दं च पप्रच्छ शबरक्षणजां कथाम् ॥ १४ ॥
सोऽवदद्देव! यद्यस्ति भवतोऽत्र कुतूहलम्।
तदैकमानसो भूत्वा शृणु त्वं कथयाम्यहम् ॥ १५ ॥
नन्वहं धनलोभेनाङ्गीकृत्य शबरक्षणम्।
यावदस्थामप्रमत्तो गृहीत्वा चुरिकां करे ॥ १६ ॥
गतेऽथ प्रथमे यामे रात्रेराविरभूत्तदा।
स्फोटयन्निव ब्रह्माण्डं प्रचण्डः फेरवीरवः ॥ १७ ॥
ज्वलद्दावानलज्वालाजालपिङ्गलरोमकाः।
क्षणाच्च परितः स्वस्य शृगालीर्दृष्टवानहम् ॥ १८ ॥
क्लीबजीवितनाशाभिस्ताभिरक्षुभिते मयि।
द्वितीये प्रहरे रात्रेः प्रादुरासन्निशाचराः ॥ १९ ॥

---

(१) द ततः।

दुःखमप्युररीकृत्य श्रयणीयस्ततो मया।
सुलभो राज्यलाभोऽपि न तु स्नेहपरो जनः॥ ४८॥
ऊचे च सुभग! प्राणास्तवाऽऽयत्ता इमे मम।
त्वया [1]सहागमिष्यामि वेत्ति किं न भवानिदम्॥ ४९॥
अन्धो नरपतिश्चित्तं व्याख्यानं महिला जलम्।
तत्रैतानि हि गच्छन्ति नीयन्ते यत्र शिक्षितैः॥ ५०॥
ज्ञात्वा मनोरथान् सिद्धानिति मित्रो जगाद ताम्।
फेत्काराः सर्षपक्षेपे त्वया मोच्या नृपान्तिके॥ ५१॥
उपेत्य च नृपं प्रोचे सा मारी मम सद्महे।
प्राप्ता ढौकय किं त्वेकं भूपते! शीघ्रवाहनम्॥ ५२॥
तत्राऽधिरोप्य यामिन्यां त्वद्देशान्तं नयाम्य[2]हम्।
उदेष्यत्यन्तरा सूर्यश्चेन्मारी सा तथा स्थिता॥ ५३॥
ततो भीतेन राज्ञाऽस्य ढौकिता वडवा निजा।
वायुवेगवती प्राणप्रिया लोकहितैषिणा॥ ५४॥
सन्ध्याकाले च केशेषु गृहीत्वा सा समर्पिता।
तस्य तेनापि फेत्कारान् मुञ्चती हक्किताऽसकृत्॥ ५५॥
ततस्तां वडवारूढां पुरस्कृत्य चचाल सः।
राजाऽपि गोपुरं यावत् तावन्नित्य गृहं ययौ॥ ५६॥
मित्रानन्दमवादीत्साऽर्वत्यां त्वमपि सुन्दर!।
अस्यामारुह किं पादचारेण सति वाहने॥ ५७॥

---

(१) ट सह गमिष्यामि।
(२) ङ अ ण द -ष्यमूम्।

नास्ति मत्सदृशः कश्चिदविमर्शितकारकः ।
कृतोपकारं निघ्नंस्तं कृतघ्नोऽप्यहमेव हि ॥ ९२ ॥
अभाणि देव्या रभसकृतानामिह कर्मणाम् ।
विपाको हृदये दाही स्यादाजन्मापि शल्यवत् ॥ ९३ ॥
राजन् ! रात्रेर्विनोदाय कथितेयं कथा मया ।
कथायाः परमार्थस्तु श्लोकयुग्मेन कथ्यते ॥ ९४ ॥

तद्यथा—

भक्तः सर्वगुणैर्युक्तो हतो येन शुभङ्करः ।
कृतघ्नो भूतले शत्रुदमनात् कोऽपि नापरः ॥ ९५ ॥
अकारणोत्पन्नरोषे हिंसा निर्दोषमानुषे ।
कार्या नरेण नो शत्रुदमनेन कृता यथा ॥ ९६ ॥
आख्याय सत्कथामेतां गते यामि तृतीयके ।
रात्रेर्दुर्लभराजोऽपि समुत्थाय ययौ गृहम् ॥ ९७ ॥
तत्राऽऽसीनमथो कीर्तिराजं भूपतिरब्रवीत् ।
कार्यमेकं मामकीनं त्वया सेत्स्यति किं न वा ? ॥ ९८ ॥
सोऽप्यवोचत् न चेत् कार्यं साधयिष्यामि ते विभो ! ।
तत् त्वामाराधयिष्यामि चलस्नेहमहं कथम् ? ॥ ९९ ॥
भ्रातुः शीर्षमानयेति भणितः सोऽथ भूभुजा ।
गतप्रत्यागतं कृत्वा किञ्चिदूचे सुधीरिदम् ॥ २०० ॥
शर्वर्याः प्रान्तकालत्वात् सर्वे जाग्रति यामिकाः ।
पुनः प्रस्तावे देवायं तत्राऽऽदेशो विधास्यते ॥ १ ॥

